## १९. प्रश्नोत्तरम्

लोट्

पिता - नलिनि ! अद्य भवत्याः सख्यः सन्ति खलु । अहं प्रश्नान् पृच्छामि । भवत्यः उत्तरं वदन्तु ।

नलिनी - भवान् कष्टकरं प्रश्नं मा पृच्छतु । भोः आगच्छन्तु । वयमेव जयं प्राप्नुमः । तात ! अन्ते उपायनं किमपि ददातु ।

पिता - प्रथमः प्रश्नः - अहं कन्दुकम् उपरि क्षिपामि । किमर्थं सः अधः पतति ? माया वदतु ।

माया - कन्दुकं ग्रहणार्थं तत्र कोऽपि नास्ति । अतः अधः पतति ।

पिता - समीचीनम्; रामः कृष्णस्य अनुजः । कृष्णस्य पिता शिवः रामस्य पिता कः ? गिरिजा वदतु ।

गिरिजा - अहो तावदपि न जानाति वा ? रामस्य पिता दशरथः ।

पिता - असमीचानम् । एतस्य अङ्कः नास्ति ।

नलिनी - किमर्थं तात !

पिता - अहो ! अहमिदानीं रामायणस्य राम विषये न पृष्टवान् । स्मरति ? भवतु अन्यः प्रश्नः । स्पर्धायाः अन्ते कः कार्यक्रमः अस्ति ? अथवा स्पर्धायाः अन्ते कः किं ददाति ?

माया - एतस्य उत्तरं नलिन्याः पिता एव जानाति ।

पिता - कः अर्थः ? विस्तरेण वदतु ।

नलिनी - एषा अपि स्पर्धा न वा ? भवान् किम् ददाति ?

माया - भवान् नलिन्याः पिता अस्ति । भवान् एव सुन्दरं उपायनं दास्यति ।

पिता - या पञ्चप्रश्नानामुत्तरं सम्यक् वदिष्यति तस्यै अहम् एकां सुन्दरीं पाञ्चलिकां दास्यामि ।

---